"पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्कणम् ।
रास्ना विड़ङ्गत्रिफला देवदारुकचित्रकम् ।
अमृतां पद्मकं क्षौद्रं विषञ्चैव विचूर्णयेत् ।
द्विगुञ्जं वातकासार्त्तः सेवयेदमृतार्णवम्" ॥
इति अमृतार्णवो रसः ॥ * ॥
"भस्मताम्राभ्रकान्तानां कासमत्वर्दचो रसैः ।
मुनिनिर्गुण्डिकासाम्लेन दिनं मर्द्यं प्रयत्नतः ॥
निष्कार्द्धं पित्तकासार्त्तो भक्षयेच्च दिनत्रयम् ।
श्वासकासाग्निमान्द्यञ्च क्षयकासं निकृन्तति" ॥
इति पित्तकासान्तको रसः ॥ * ॥
"सुशुद्धं पारदं गन्धं प्रत्येकं शुक्तिसम्मितम् ।
ततः कज्जलिकां कृत्वा मर्दयेच्च पृथक् पृथक् ।
विश्वाग्निमन्थश्योनाककाश्मर्य्यः पाटला बला ।
मुस्तं पुनर्नवा धात्री वृहतीद्वयपञ्चकम् ॥
विदारी बऊपुत्री च एषां कर्षरसैः पृथक् ।
सुवर्णं रजतं ताम्रं प्रत्येकं शाणमानकम् ॥
पलमात्रन्तु कृष्णाभ्रं तदर्द्धन्तु शिलाश्मयम् ।
जातीकोषफलं मांसी तालीशैला लवङ्गकम् ।
प्रत्येकं कोलमानन्तु वासानीरैर्विमर्दयेत् ।
शोषयित्वा ततः पश्चाद्विदारी रसमर्दितः ॥
त्रिगुञ्जां तां वटीं खादेत्पिप्पली मधुसंयुताम् ।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्म्मितः ॥
पञ्च कासाग्निहन्त्याशु चिरकालसमुद्भवम् ।
राजयक्ष्माणमत्युग्रमित्यादि बहवो गुणाः" ॥
इति नित्योदयो रसः ॥ * ॥
"शुद्धं कृष्णाभ्रचूर्णं द्विपलपरिमितं
शाणमानं यदन्यत्
कर्पूरं जातिकोषं सजलमिभकणा-
तेजपत्रं लवङ्गम् ।
मांसीतालीशचोचं गजकुसुमगदं-
धातकीचेति तुल्यम्
पथ्याधात्री विभीतं त्रिकटुरपि पृथक्
त्वर्द्धशाणं द्विशाणम् ॥
एला जातीफलाख्यं च्छितितलविधिना
शुद्धगन्धस्य कोलम्
कोलार्द्धं पारदस्य प्रतिपदविहितं
पिष्टमेकत्र मिश्रम् ।
पाणीयेनैवकार्य्याः परिणतचणक-
स्विन्नतुल्याश्च वट्यः
प्रातःखादाञ्चतस्रक्रदनु खलु कियत्
शृङ्गवेरं सपर्णम् ॥
पाणीयं पीतमन्ते ध्रुवमपहरति-
क्षिप्रमेतान् विकारान्
कोष्ठे दुष्टाग्निजातान् ज्वरमुदररुजं-
राजयक्ष्मक्षतञ्च ।
कासं श्वासं सशोथं नयनपरिभवं-
मेहमेदो विकारान्
हन्यादामानिलोत्थान् कफपवनकृतान्
पित्तरोगान् विशेषान् ॥
वल्योवृष्यश्च योगश्चलनकरवरः-
सर्व्वरोगप्रशस्तः
पथ्यं मांसैश्च यूषैर्घृतपरिलुलित-
गव्यदुग्धञ्च भूयः ।
भोज्यो योज्यो यथेष्टं ललितललनया-
दीयमानो मुदा यत्
शृङ्गाराभ्रेणकामी युवतिजनशता-
भोगयोगादतुष्टः ॥
वर्ज्यं शाकाम्लमादौ न च कतिपयचित्-
स्वेच्छया भोज्यमानः" ॥
इति शृङ्गाराभ्रः ॥ * ॥
"जीर्णं सुवर्णं लौहं वा यद्यत्रैव प्रदीयते ।
तदायं सर्व्वरोगाणां सार्व्वभौमो न संशयः" ॥
इति सार्व्वभौमो रसः । * ॥
"त्रिकटु त्रिफलाधान्यं चव्यं चित्रकसैन्धवम् ।
दिव्यौषधिहतञ्चापि सर्व्वतुल्यन्त्वयोरजः ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वामृतेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसैर्व्वापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं दोषत्रयसमुद्भवम् ।
वातिकं पैत्तिकञ्चैव गरदोषसमुद्भवम् ।
सरक्तमथवा रक्तं कासश्वाससमन्वितम् ॥
हृद्दाहभ्रमशूलघ्नी रुच्या वह्निप्रदीपनी ।
बलवर्णकरी वृष्या जीर्णज्वरविनाशिनी ॥
इयं चन्द्रामृता नाम्ना चन्द्रनाथेन निर्म्मिता ।
वासागुडूचिका भार्गी मुस्तकं कण्टकारिका ।
भोजनान्ते प्रकर्त्तव्या वटिका कार्य्यसिद्धये" ॥
इति श्रीचन्द्रामृता वटी । चन्द्रामृतं लौहमित्यपि पाठः ॥ * ॥
"रसगन्धकलौहानां प्रत्येकं कार्षिकं क्षिपेत् ।
टङ्कणस्य पलं दत्त्वा मरिचस्य पलार्द्धकम् ॥
त्रिकटुत्रिफलाचव्य धान्यजीरकसैन्धवम् ।
प्रत्येकं तोलकं ग्राह्यं छागीदुग्धेन पेषयेत् ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वामृतेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसेनापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं वातरक्तकफोद्भवम् ।
सरक्तमथवा रक्तं ज्वरश्वाससमन्वितम् ॥
हृच्छूलं पार्श्वशूलञ्च जीर्णज्वरविनाशनः ।
चन्द्रामृतरसो नाम चन्द्रनाथेन भाषितः" ॥
इति वृहच्चन्द्रामृतो रसः । * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे कासरोगाधिकारे ॥ * ॥ * ॥
अथ कासपथ्यम् ॥
"स्वेदो विरेचनं छर्दिर्धूमपानं समाशनम् ।
शालिषष्टिकगोधूमश्यामाकयवकोद्रवाः ॥
आत्मगुप्ता माषमुद्गकुलत्थानां रसाः पृथक् ।
ग्राम्यौदकानूपधन्वमांसानि विविधानि च ॥
सुरा पुरातनं सर्पिश्छागञ्चापि पयो घृतम् ।
वास्तुकं वायसी शाकं वार्त्ताकुं बालमूलकम् ॥
कण्टकारी कासमर्द्दो जीवन्ती सुनिषण्णकम् ।
द्राक्षाविम्बी मातुलुङ्गं पौष्करं वासकस्तुटिः ॥
गोमूत्रं शुनं पथ्या व्योषसुष्णोदकं मधु ।
लाजा दिवसनिद्रा च लघून्यन्नानि यानि च ॥
पथ्यमेतद्यथा दोषमुक्तं कासगदातुरे" ॥
अथापथ्यमाह ॥
"वस्तिं नस्यमसृङ्मोक्षं व्यायामं दन्तघर्षणम् ।
आतपं दुष्टपवनं रजोमार्गनिषेवणम् ॥
विष्टम्भीनि विदाहीनि रूक्षाणि विविधानि च ।
शुक्रमूत्रोद्गारकासवमिवेगनिधारणम् ॥
मत्स्यं कन्दं सर्षपञ्च तुम्बीफलमुपोदिकाम् ।
दुष्टाम्बु चान्नपानञ्च विरुद्धान्यशनानि च ॥
गुरुशीतञ्चान्नपानं कासरोगी परित्यजेत्" ॥
इति वैद्यकपथ्यापथ्यविधौ कासरोगाधिकारः ॥ * ॥)
काशत्वम् । इत्यमरटीकायां भरतः ॥ शोभाञ्जनः । इति शब्दचन्द्रिका ॥

कासकन्दः, पुं, (कासहेतुः कन्दः ।) काषालुः । इति राजनिर्घण्टः ॥

कासघ्नी, स्त्री, (कासं हन्ति । कास + हन् + टक् । स्त्रियां ङीप् ।) कण्टकारी । इति शब्दचन्द्रिका ॥ (कण्टकारीशब्देऽस्या गुणादिविवरणं ज्ञेयम् ॥)

कासजित्, स्त्री, (कासं जयतीति । कास + जि + क्विप् ।) भार्गी । इति राजनिर्घण्टः ॥

कासनाशिनी, स्त्री, (कासं नाशयतीति । कास + नश् + णिच् + णिनिः ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कासन्दीवटिका, स्त्री, (कासं द्यति नाशयतीति । दो + कः ततो ङीष् । कासन्दीं वटति वक्ति तन्नाम्ना प्रकाशते इत्यर्थः । वट + ण्वुल् । टाप् अत इत्वम् । कासन्दीवटिका इति पारिभाषिकनाम्ना आख्यायते वा ।) वेसवारविशेषः । गोटा कासुन् इति भाषा । अस्या गुणाः । हृद्यत्वम् । वातश्लेष्मरोगनाशित्वम् । रुच्यग्निकारित्वम् । वायुमलानुलोमकारित्वञ्च । इति राजवल्लभः ॥

कासमर्द्दः, पुं, (कासं मृद्नाति । कास + मृद् + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) पेषितजलमिश्रितवस्त्रगलितवेसवारः । इति पाकराजेश्वरः ॥ कासुन्दी इति ख्यातः । गुल्मभेदः । इत्यमरभरतौ ॥ काल कासुन्दा इति भाषा ॥ शेषस्य पर्य्यायः । अरिमर्द्दः २ कासारिः ३ कासमर्द्दकः ४ कालः ५ कनकः ६ जरणः ७ दीपनः ८ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । कफवाताजीर्णकासपित्तनाशित्वम् । पाचकत्वम् । कण्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥ अग्निदीपनत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥ अस्य पत्रगुणाः । रुचिकारित्वम् । शुक्रवर्द्धकत्वम् । कासविषरक्तकफवातपित्तनाशित्वम् । मधुरत्वम् । पाचनत्वम् । कण्ठशोधनत्वम् । लघुत्वम् । विशेषतः कासहरत्वम् । ग्राहकत्वञ्च । इति राजनिर्घण्टः ॥

कासमर्द्दनः, पुं, (कासं मृद्नाति । कास + मृद् + कर्त्तरि ल्युः । कासस्य मर्द्दनो वा ।) पटोलः । इति राजनिर्घण्टः ॥

कासरः, पुं, (के जले आसरति । आ + सृ + अच् । महिषस्य प्रायेण जलवासात्तथात्वम् ।) महिषः । इत्यमरः ।२।५।४॥ (यथा, आर्य्यासप्तशती ५२१ ।